# shrIsubrahmaNyatrishatIstotram

# શ્રીસુબ્રહ્મણ્યત્રિશતીસ્તોત્રમ્

## Document Information

Text title : subrahmaNya trshatIstotram

File name : subrahmaNyatrishatI.itx

Category : shatI, subrahmanya, trishatI

Location : doc_subrahmanya

Transliterated by : KSR Ramachandran kalksr at gmail.com

Proofread by : KSR Ramachandran kalksr at gmail.com, T N Ramakrishnan tnrk64 at gmail.com

Latest update : July 8, 2009

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યત્રિશતીસ્તોત્રમ્

ૐ સૌં શરવણભવઃ શરચ્ચન્દ્રાયુતપ્રભઃ ।
શશાઙ્કશેખરસુતઃ શચીમાઙ્ગલ્યરક્ષકઃ ॥ ૧
શતાયુષ્યપ્રદાતા ચ શતકોટિરવિપ્રભઃ ।
શચીવલ્લભસુપ્રીતઃ શચીનાયકપૂજિતઃ ॥ ૨
શચીનાથચતુર્વક્ત્રદેવદૈત્યાભિવન્દિતઃ ।
શચીશાર્તિહરશ્ચૈવ શંભુઃ શંભૂપદેશકઃ ॥ ૩
શઙ્કરઃ શઙ્કરપ્રીતઃ શંયાકકુસુમપ્રિયઃ ।
શઙ્કુકર્ણમહાકર્ણપ્રમુખાદ્યભિવન્દિતઃ ॥ ૪
શચીનાથસુતાપ્રાણનાયકઃ શક્તિપાણિમાન્ ।
શઙ્ખપાણિપ્રિયઃ શઙ્ખોપમષડ્ગલસુપ્રભઃ ॥ ૫
શઙ્ખઘોષપ્રિયઃ શઙ્ખચક્રશૂલાદિકાયુધઃ ।
શઙ્ખધારાભિષેકાદિપ્રિયઃ શઙ્કરવલ્લભઃ ॥ ૬
શબ્દબ્રહ્મમયશ્ચૈવ શબ્દમૂલાન્તરાત્મકઃ ।
શબ્દપ્રિયઃ શબ્દરૂપઃ શબ્દાનન્દઃ શચીસ્તુતઃ ॥ ૭
શતકોટિપ્રવિસ્તારયોજનાયતમન્દિરઃ ।
શતકોટિરવિપ્રખ્યરત્નસિંહાસનાન્વિતઃ ॥ ૮
શતકોટિમહર્ષીન્દ્રસેવિતોભયપાર્શ્વભૂઃ ।
શતકોટિસુરસ્ત્રીણાં નૃત્તસઙ્ગીતકૌતુકઃ ॥ ૯
શતકોટીન્દ્રદિક્પાલહસ્તચામરસેવિતઃ ।
શતકોટ્યખિલાણ્ડાદિમહાબ્રહ્માણ્ડનાયકઃ ॥ ૧૦
શઙ્ખપાણિવિધિભ્યાં ચ પાર્શ્વયોરુપસેવિતઃ ।
શઙ્ખપદ્મનિધીનાં ચ કોટિભિઃ પરિસેવિતઃ ॥ ૧૧
શશાઙ્કાદિત્યકોટીભિઃ સવ્યદક્ષિણસેવિતઃ ।
શઙ્ખપાલાદ્યષ્ટનાગકોટીભિઃ પરિસેવિતઃ ॥ ૧૨
શશાઙ્કારપતઙ્ગાદિગ્રહનક્ષત્રસેવિતઃ ।

શશિભાસ્કરભૌમાદિગ્રહદોષાર્તિભઞ્જનઃ ॥ ૧૩
શતપત્રદ્વયકરઃ શતપત્રાર્ચનપ્રિયઃ ।
શતપત્રસમાસીનઃ શતપત્રાસનસ્તુતઃ ॥ ૧૪
શારીરબ્રહ્મમૂલાદિષડાધારનિવાસકઃ ।
શતપત્રસમુત્પન્નબ્રહ્મગર્વનિભેદનઃ ॥ ૧૫
શશાઙ્કાર્ધજટાજૂટઃ શરણાગતવત્સલઃ ।
રકારરૂપો રમણો રાજીવાક્ષો રહોગતઃ ॥ ૧૬
રતીશકોટિસૌન્દર્યો રવિકોટ્યુદયપ્રભઃ ।
રાગસ્વરૂપો રાગઘ્નો રક્તાબ્જપ્રિય એવ ચ ॥ ૧૭
રાજરાજેશ્વરીપુત્રો રાજેન્દ્રવિભવપ્રદઃ ।
રત્નપ્રભાકિરીટાગ્રો રવિચન્દ્રાગ્નિલોચનઃ ॥ ૧૮
રત્નાઙ્ગદમહાબાહૂ રત્નતાટઙ્કભૂષણઃ ।
રત્નકેયૂરભૂષાઢ્યો રત્નહારવિરાજિતઃ ॥ ૧૯
રત્નકિઙ્કિણિકાઞ્ચ્યાદિબદ્ધસત્કટિશોભિતઃ ।
રવસંયુક્તરત્નાભનૂપુરાઙ્ઘ્રિસરોરુહઃ ॥ ૨૦
રત્નકઙ્કણચૂલ્યાદિસર્વાભરણભૂષિતઃ ।
રત્નસિંહાસનાસીનો રત્નશોભિતમન્દિરઃ ॥ ૨૧
રાકેન્દુમુખષટ્કશ્ચ રમાવાણ્યાદિપૂજિતઃ ।
રાક્ષસામરગન્ધર્વકોટિકોટ્યભિવન્દિતઃ ॥ ૨૨
રણરઙ્ગે મહાદૈત્યસઙ્ગ્રામજયકૌતુકઃ ।
રાક્ષસાનીકસંહારકોપાવિષ્ટાયુધાન્વિતઃ ॥ ૨૩
રાક્ષસાઙ્ગસમુત્પન્નરક્તપાનપ્રિયાયુધઃ ।
રવયુક્તધનુર્હસ્તો રત્નકુક્કુટધારણઃ ॥ ૨૪
રણરઙ્ગજયો રામાસ્તોત્રશ્રવણકૌતુકઃ ।
રમ્ભાઘૃતાચીવિશ્વાચીમેનકાદ્યભિવન્દિતઃ ॥ ૨૫
રક્તપીતાંબરધરો રક્તગન્ધાનુલેપનઃ ।
રક્તદ્વાદશપદ્માક્ષો રક્તમાલ્યવિભૂષિતઃ ॥ ૨૬
રવિપ્રિયો રાવણેશસ્તોત્રસામમનોધરઃ ।
રાજ્યપ્રદો રન્ધ્રગુહ્યો રતિવલ્લભસુપ્રિયઃ ॥ ૨૭
રણાનુબન્ધનિર્મુક્તો રાક્ષસાનીકનાશકઃ ।
રાજીવસંભવદ્વેષી રાજીવાસનપૂજિતઃ ॥ ૨૮
રમણીયમહાચિત્રમયૂરારૂઢસુન્દરઃ ।

રમાનાથસ્તુતો રામો રકારાકર્ષણક્રિયઃ ॥ ૨૯
વકારરૂપો વરદો વજ્રશક્ત્યભયાન્વિતઃ ।
વામદેવાદિસમ્પૂજ્યો વજ્રપાણિમનોહરઃ ॥ ૩૦
વાણીસ્તુતો વાસવેશો વલ્લીકલ્યાણસુન્દરઃ ।
વલ્લીવદનપદ્માર્કો વલ્લીનેત્રોત્પલોડુપઃ ॥ ૩૧
વલ્લીદ્વિનયનાનન્દો વલ્લીચિત્તતટામૃતમ્ ।
વલ્લીકલ્પલતાવૃક્ષો વલ્લીપ્રિયમનોહરઃ ॥ ૩૨
વલ્લીકુમુદહાસ્યેન્દુઃ વલ્લીભાષિતસુપ્રિયઃ ।
વલ્લીમનોહૃત્સૌન્દર્યો વલ્લીવિદ્યુલ્લતાઘનઃ ॥ ૩૩
વલ્લીમઙ્ગલવેષાઢ્યો વલ્લીમુખવશઙ્કરઃ ।
વલ્લીકુચગિરિદ્વન્દ્વકુંકુમાઙ્કિતવક્ષકઃ ॥ ૩૪
વલ્લીશો વલ્લભો વાયુસારથિર્વરુણસ્તુતઃ ।
વક્રતુણ્ડાનુજો વત્સો વત્સલો વત્સરક્ષકઃ ॥ ૩૫
વત્સપ્રિયો વત્સનાથો વત્સવીરગણાવૃતઃ ।
વારણાનનદૈત્યઘ્નો વાતાપિઘ્નોપદેશકઃ ॥ ૩૬
વર્ણગાત્રમયૂરસ્થો વર્ણરૂપો વરપ્રભુઃ ।
વર્ણસ્થો વારણારૂઢો વજ્રશક્ત્યાયુધપ્રિયઃ ॥ ૩૭
વામાઙ્ગો વામનયનો વચદ્ભૂર્વ્મનપ્રિયઃ ।
વરવેષધરો વામો વાચસ્પતિસમર્ચિતઃ ॥ ૩૮
વસિષ્ઠાદિમુનિશ્રેષ્ઠવન્દિતો વન્દનપ્રિયઃ ।
વકારનૃપદેવસ્ત્રીચોરભૂતારિમોહનઃ ॥ ૩૯
ણકારરૂપો નાદાન્તો નારદાદિમુનિસ્તુતઃ ।
ણકારપીઠમધ્યસ્થો નગભેદી નગેશ્વરઃ ॥ ૪૦
ણકારનાદસન્તુષ્ટો નાગાશનરથસ્થિતઃ ।
ણકારજપસુપ્રીતો નાનાવેષો નગપ્રિયઃ ॥૪૧
ણકારબિન્દુનિલયો નવગ્રહસુરૂપકઃ ।
ણકારપઠનાનન્દો નન્દિકેશ્વરવન્દિતઃ ॥ ૪૨
ણકારઘણ્ટાનિનદો નારાયણમનોહરઃ ।
ણકારનાદશ્રવણો નલિનોદ્ભવશિક્ષકઃ ॥ ૪૩
ણકારપઙ્કજાદિત્યો નવવીરાધિનાયકઃ ।
ણકારપુષ્પભ્રમરો નવરત્નવિભૂષણઃ ॥ ૪૪
ણકારાનર્ઘશયનો નવશક્તિસમાવૃતઃ ।

ણકારવૃક્ષકુસુમો નાટ્યસઙ્ગીતસુપ્રિયઃ ॥ ૪૫
ણકારબિન્દુનાદજ્ઞો નયજ્ઞો નયનોદ્ભવઃ ।
ણકારપર્વતેન્દ્રાગ્રસમુત્પન્નસુધારણિઃ ॥ ૪૬
ણકારપેટકમણિર્નાગપર્વતમન્દિરઃ ।
ણકારકરુણાનન્દો નાદાત્મા નાગભૂષણઃ ॥ ૪૭
ણકારકિઙ્કિણીભૂષો નયનાદૃશ્યદર્શનઃ ।
ણકારવૃષભાવાસો નામપારાયણપ્રિયઃ ॥ ૪૮
ણકારકમલારૂઢો નામાનન્તસમન્વિતઃ ।
ણકારતુરગારૂઢો નવરત્નાદિદાયકઃ ॥ ૪૯
ણકારમકુટજ્વાલામણિર્નવનિધિપ્રદઃ ।
ણકારમૂલમન્ત્રાર્થો નવસિદ્ધાદિપૂજિતઃ ॥ ૫૦
ણકારમૂલનાદાન્તો ણકારસ્તમ્ભનક્રિયઃ ।
ભકારરૂપો ભક્તાર્થો ભવો ભર્ગો ભયાપહઃ ॥ ૫૧
ભક્તપ્રિયો ભક્તવન્દ્યો ભગવાન્ભક્તવત્સલઃ ।
ભક્તાર્તિભઞ્જનો ભદ્રો ભક્તસૌભાગ્યદાયકઃ ॥ ૫૨
ભક્તમઙ્ગલદાતા ચ ભક્તકલ્યાણદર્શનઃ ।
ભક્તદર્શનસન્તુષ્ટો ભક્તસઙ્ઘસુપૂજિતઃ ॥ ૫૩
ભક્તસ્તોત્રપ્રિયાનન્દો ભક્તાભીષ્ટપ્રદાયકઃ ।
ભક્તસમ્પૂર્ણફલદો ભક્તસામ્રાજ્યભોગદઃ ॥ ૫૪
ભક્તસાલોક્યસામીપ્યરૂપમોક્ષવરપ્રદઃ ।
ભવૌષધિર્ભવઘ્નશ્ચ ભવારણ્યદવાનલઃ ॥ ૫૫
ભવાન્ધકારમાર્તાણ્ડો  ભવવૈદ્યો ભવાયુધમ્ ।
ભવશૈલમહાવજ્રો ભવસાગરનાવિકઃ ॥ ૫૬
ભવમૃત્યુભયધ્વંસી ભાવનાતીતવિગ્રહઃ ।
ભવભૂતપિશાચઘ્નો ભાસ્વરો ભારતીપ્રિયઃ ॥ ૫૭
ભાષિતધ્વનિમૂલાન્તો ભાવાભાવવિવર્જિતઃ ।
ભાનુકોપપિતૃધ્વંસી ભારતીશોપદેશકઃ ॥ ૫૮
ભાર્ગવીનાયકશ્રીમદ્ભાગિનેયો ભવોદ્ભવઃ ।
ભારક્રૌઞ્ચાસુરદ્વેષો ભાર્ગવીનાથવલ્લભઃ ॥ ૫૯
ભટવીરનમસ્કૃત્યો ભટવીરસમાવૃતઃ ।
ભટતારાગણોડ્વીશો ભટવીરગણસ્તુતઃ ॥ ૬૦
ભાગીરથેયો ભાષાર્થો ભાવનાશબરીપ્રિયઃ ।

ભકારે કલિચોરારિભૂતાદ્યુચ્ચાટનોદ્યતઃ ॥ ૬૧
વકારસુકલાસંસ્થો વરિષ્ઠો વસુદાયકઃ ।
વકારકુમુદેન્દુશ્ચ વકારાબ્ધિસુધામયઃ ॥ ૬૨
વકારામૃતમાધુર્યો વકારામૃતદાયકઃ ।
વજ્રાભીતિદક્ષહસ્તો વામે શક્તિવરાન્વિતઃ ॥ ૬૩
વકારોદધિપૂર્ણેન્દુઃવકારોદધિમૌક્તિકમ્ ।
વકારમેઘસલિલો વાસવાત્મજરક્ષકઃ ॥ ૬૪
વકારફલસારજ્ઞો વકારકલશામૃતમ્ ।
વકારપઙ્કજરસો વસુવંશવિવર્ધનઃ ॥ ૬૫
વકારદિવ્યકમલભ્રમરો વાયુવન્દિતઃ ।
વકારશશિસઙ્કાશો વજ્રપાણિસુતાપ્રિયઃ ॥ ૬૬
વકારપુષ્પસદ્ગન્ધો વકારતટપઙ્કજમ્ ।
વકારભ્રમરધ્વાનો વયસ્તેજોબલપ્રદઃ ॥ ૬૭
વકારવનિતાનાથો વશ્યાદ્યષ્ટપ્રિયાપ્રદઃ ।
વકારફલસત્કારો વકારાજ્યહુતાશનઃ ॥ ૬૮
વર્ચસ્વી વાઙ્મનોઽતીતો વાતાપ્યરિકૃતપ્રિયઃ ।
વકારવટમૂલસ્થો વકારજલધેસ્તટઃ ॥ ૬૯
વકારગઙ્ગાવેગાબ્ધિઃ વજ્રમાણિક્યભૂષણઃ ।
વાતરોગહરો વાણીગીતશ્રવણકૌતુકઃ ॥ ૭૦
વકારમકરારૂઢો વકારજલધેઃ પતિઃ ।
વકારામલમન્ત્રાર્થો વકારગૃહમઙ્ગલમ્ ॥ ૭૧
વકારસ્વર્ગમાહેન્દ્રો વકારારણ્યવારણઃ ।
વકારપઞ્જરશુકો વલારિતનયાસ્તુતઃ ॥ ૭૨
વકારમન્ત્રમલયસાનુમન્મન્દમારુતઃ ।
વાદ્યન્તભાન્તષટ્ક્રમ્યજપાન્તે શત્રુભઞ્જનઃ ॥ ૭૩
વજ્રહસ્તસુતાવલ્લીવામદક્ષિણસેવિતઃ ।
વકુલોત્પલકાદમ્બપુષ્પદામસ્વલઙ્કૃતઃ ॥ ૭૪
વજ્રશક્ત્યાદિસમ્પન્નદ્વિષટ્પાણિસરોરુહઃ ।
વાસનાગન્ધલિપ્તાઙ્ગો વષટ્કારો વશીકરઃ ॥ ૭૫
વાસનાયુક્તતાંબૂલપૂરિતાનનસુન્દરઃ ।
વલ્લભાનાથસુપ્રીતો વરપૂર્ણામૃતોદધિઃ ॥ ૭૬
ઇતિ

Encoded and proofread by KSR Ramachandran kalksr at gmail.com

*shrIsubrahmaNyatrishatIstotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*